# आदर्शसंस्कृतशिक्षकः शिक्षिका वा

**डा. रमण मिश्र**

वरिष्ठशोधाध्येता

संस्कृतसंवर्धनप्रतिष्ठानम्

ramanmishra869@gmail.com

**सारांशः -**

*यः सुमनसा सौम्यचित्तेन सौम्यप्रकारेण संस्कृतं संस्कृतमाध्यमेन पाठयति । परिवेशं संस्कृतमयं कृत्वा छात्रान् छात्राः वा संस्कृतम् अर्जयितुं प्रेरयति । तान्/ताः 'जागरूकं' कृत्वा 'मानवीयं समाजं निर्मातुं' प्रयत्नशीलः प्रयत्नशीला वा भवति सः/सा एव शिक्षकाणां धुरि स्थित्वा आदर्शमयशिक्षकस्य शिक्षिकायाः वा स्वरूपं प्रदर्शयति ।*

## प्रस्तावना

**शिष्टा क्रिया कस्यचिदात्मसंस्था, संक्रान्तिरन्यस्य विशेषयुक्ता ।**
**यस्योभयं साधु स शिक्षकाणां, धुरि प्रतिष्ठापयितव्य एव ॥**[1]

संस्कृतशिक्षणस्य कानिचन उद्देश्यानि सन्ति । तेषाम् उद्देश्यानां पूर्तिरेव संस्कृतशिक्षकस्य कार्यम् अस्ति । स्पष्टमेव यत् संस्कृतशिक्षकस्य सम्बन्धः संस्कृतशिक्षणेन अर्थात् संस्कृतशिक्षणस्य उद्देश्यैः सह भवति । संस्कृतशिक्षणं नाम किम् ? संस्कृतस्य शिक्षणं संस्कृतशिक्षणम् इति उच्यते । संस्कृतं किम् ? संस्कृतं नाम भाषा । अतः संस्कृतभाषायाः भाषिकतत्त्वानाम् अर्थात् वर्णानां, शब्दरूपाणां, धातुरूपाणां, लकाराणां, सन्धीनां, समासानां, विशेषण-विशेष्यादीनां शिक्षणं संस्कृतशिक्षणम् इति मन्यते । अतः एतेषां भाषिकतत्त्वानां शिक्षणम् एव संस्कृतशिक्षणम् । वयं जानीमः यत् अस्माकं प्राचीनं साहित्यं संस्कृतेन एव लिखितम् अर्थात् अस्माकं संस्कृतसाहित्यं मूलतः संस्कृते एव विद्यते । अतः संस्कृतशिक्षणस्य लक्ष्यम् अस्ति यत् पठितारः संस्कृतसाहित्यम् अवगन्तुं समर्थाः भवेयुः । अस्याः प्रक्रियायाः साधकः एव 'आदर्शसंस्कृतशिक्षकः' इति ।

संस्कृतशिक्षकः संस्कृतशिक्षिका वा सरलमानकसंस्कृतेन पाठयति । 'संस्कृतकक्ष्या प्रयोगशाला इव' इति तस्य तस्याः वा प्रयासः भवति । संस्कृतशिक्षणे नवाचारः, भाषाकौशलेषु दक्षता, भाषाभ्यासाय अवसरप्रदानम् नवीनशिक्षणपद्धतीनां प्रयोगः इत्येतानि संस्कृतशिक्षकस्य लक्षणानि । एवमेव तस्य तस्याः वा अन्यानि लक्षणानि सन्ति -

- संस्कृतशिक्षणस्य उद्देश्यानां स्पष्टता भवेत् ।
- संस्कृतशिक्षणेन सह परिचितः भवेत् ।
- भाषातत्त्वेषु दक्षः स्यात् ।
- भाषाकौशलेषु समर्थः स्यात् ।
- विशेषणविशेष्ययोः ज्ञानं भवेत् ।

[1] ***मालविकाग्निमित्रम्; १.१६***

- सरलमानकसंस्कृतेन पाठयेत्।
- पाठ्यपुस्तकं कथं पाठनीयम् इति जानीयात्।
- संस्कृतशिक्षणे नवाचारमानयेत्।
- संस्कृतं संस्कृतेन एव।
- सम्प्रेषण-सामर्थ्यम्।

एषः एव संस्कृत शिक्षकः।

## आदर्शसंस्कृतशिक्षकस्य आधारभूतगुणाः -

### शुद्धोच्चारणम्

यदि तस्योच्चारणं शुद्धं भविष्यति तर्हि तस्य सम्पर्के स्थितानां छात्राणाम् उच्चारणं स्वतः शुद्धं भविष्यति। संस्कृतम् एका संश्लिष्टभाषा अस्ति। अत्र शब्दानाम् अशुद्धोच्चारणेन अर्थस्य अनर्थः भवति। इत्थमेव सन्धियुक्तानां पदानाम् अन्यथा विच्छेदे उच्चारणे च अर्थः विपरीतः भवितुमर्हति। प्राचीनकाले अध्यापकस्य उच्चारणावयवानां घ्राण-कर्ण-जिह्वा-कण्ठ-ओष्ठ-दन्तादीनां परीक्षणम् एतदर्थं क्रियते स्म यत् यदि अवयवाः सुस्थाः न सन्ति तर्हि अध्यापकेन शुद्धोच्चारणं कर्तुं न शक्ष्यते।

### संस्कृतभाषायाः ज्ञाता

संस्कृतशिक्षकस्य प्रथमं कर्त्तव्यमस्ति यत् तस्य संस्कृतभाषाया उपरि पूर्णाधिकारः भवेत्। सः सर्वेषां भाषातत्त्वानां ज्ञाता भवेत्।

### संस्कृतसाहित्यस्य ज्ञाता

भाषिकपक्षेण सह संस्कृतशिक्षकः संस्कृतसाहित्यस्य ज्ञाता अपि स्यात्, येन सः छात्रेभ्यः पाठ्यपुस्तके लेखकानां कवीनाञ्च विषये विस्तरेण ज्ञानं दातुं शक्नुयात्।

### संस्कृतभाषाशिक्षणस्य नवीनतमविधीनां ज्ञाता

संस्कृतशिक्षणं रोचकम्, सरलम्, सुग्राह्यं च कर्तुं संस्कृतभाषाशिक्षकः नवीनतमविधीनां ज्ञानम् अवश्यमेव स्वीकुर्यात्। शिक्षकस्य निर्वचनं कुर्वन् कालिदासः मालविकाग्निमित्रे लिखति–

**शिष्टा क्रिया कस्यचिदात्मसंस्था, संक्रान्तिरन्यस्य विशेषयुक्ता।**
**यस्योभयं साधु स शिक्षकाणां, धुरि प्रतिष्ठापयितव्य एव॥**

अस्य चायं भावः – केचन विद्याग्रहणे प्रवीणाः अपरे विद्यार्थिनां कृते बोधने कुशलाः। प्रायः शिक्षकाः विद्याग्रहणे, गृहीतविद्यायाः संक्रमणे च कुशलाः न भवन्ति। यस्मिन् शिक्षके एतद् उभयमपि भवति स एव शिक्षकः उत्तमशिक्षकत्वेन अस्माभिः प्रतिष्ठापितव्यः।

### संस्कृतसाहित्यं प्रति अभिप्रेरकः

संस्कृतसाहित्यं प्रति छात्राणां रुचिमुत्पादयितुं संस्कृतशिक्षकेण विविधपाठ्यसहगामिक्रियाणाम् आयोजनं करणीयम् । तथा च दृश्यश्रव्योपकरणानां प्रयोगेण शिक्षणस्य रुचिकरत्वं सम्पादनीयम् ।

### पाठ्यक्रमस्य समुचितविभाजकः

संस्कृतस्य कृते निर्धारितपाठ्यक्रम-उत्सवपर्व-ऋतूनाम् अनुसारेण विभज्य संस्कृतशिक्षकेण पाठनीयः । दैनिकसंस्कृतपाठाश्च उपयुक्तशिक्षणविध्यनुसारेण सोपानरूपेण क्रमबद्धाः करणीयाः ।

### व्याकरणस्य ज्ञाता

संस्कृतशिक्षकः व्याकरणस्य ज्ञाता स्यात् । येन सः स्वयं शुद्धभाषा-प्रयोगं कुर्यात् तथा च छात्रेभ्यः अपि शुद्धभाषाज्ञानं दद्यात् ।

### शुद्धः सुन्दरश्च लेखः

संस्कृतशिक्षकस्य लेखः सुन्दरः, स्पष्टः, आकर्षकः तु भवेदेव परं शुद्धः अपि स्यात् । शुद्ध-सुन्दर-लेखेन छात्राणां विसर्ग-अनुस्वार-हलन्त-विभक्तिप्रयोगसम्बद्धाः अशुद्धयः शनैः शनैः शुद्धाः भवन्ति । अनन्तरकाले एतस्य परिष्कारः विशिष्टा जटिलसमस्या जायते । अतः शिक्षकः एतस्मिन् विषये जागरूकः स्यात् ।

### कुशलमौखिकाभिव्यक्तिः

संस्कृतमाध्यमेन भाषणकलायां निष्णातः भवेत् स्वयं प्रभावशालिवक्ता सन् एव संस्कृतशिक्षकः स्वछात्रान् अपि भाषणकलायां निपुणान् कर्तुम् अर्हति ।

### संस्कृतभाषायां रुचिः

संस्कृतशिक्षकस्य संस्कृतभाषायाः साहित्यस्य पठने पाठने च विशिष्टा रुचिः स्यात् । येन सः संस्कृतशब्दरचनायां, वाक्यरचनायां, संस्कृतस्य लेखने, उच्चारणे च प्रायेण जायमानाः अशुद्धीः जानीयात् । तासां निराकरणं च कर्तुं शक्नुयात् ।

### वैज्ञानिकदृष्टिः

संस्कृतशिक्षकस्य चिन्तनं वैज्ञानिकं स्यात् । संस्कृतं नाम ईदृशी भाषा अस्ति यस्याः व्याकरणम् अतीव क्रमबद्धं, सुव्यवस्थितं, सूत्रबद्धम् अस्ति । अतः सा भाषा सङ्गणकयन्त्रस्योपरि सर्वाधिकसफलभाषा मन्यते । एवं स्थितेः संस्कृतशिक्षकः किमपि नवीनचिन्तनं कृत्वा संस्कृतभाषायां तन्त्रांशं (software) सज्जीकर्तुं शक्नोति । नवीनं शोधकार्यं च कृत्वा संस्कृतशिक्षणस्तरम् उन्नेतुम् अर्हति ।

### नीरक्षीरविवेकी

संस्कृतशिक्षकेण नवीनमूल्याङ्कनविधीनां परिचयः नूनं करणीयः येन सः स्वशिक्षणस्य छात्राणामुपलब्धीनां च मूल्याङ्कनं निष्पक्षरूपेण कृत्वा तत्र परिष्कारं कुर्यात् ।

## प्रशिक्षणप्राप्तः अनुभवी

संस्कृतशिक्षकः प्रशिक्षणमहाविद्यालयात् संस्कृतशिक्षणस्य विधिवत् प्रशिक्षणं प्राप्नुयात् शनैः शनैः सः स्वनवीनानुभवानाम् आधारेण छात्रान् संस्कृतव्याकरणस्य अनुवादस्य रचनायाश्च अभ्यासं कारयेत् । एतानि कार्याणि एकः अनुभवी संस्कृतशिक्षकः एव कुशलतापूर्वकं शिक्षणसन्दर्भे कर्तुम् अर्हति ।

## अन्तरानुशासनात्मकोपागमे कुशलः (Inter disciplinary approach)

संस्कृतशिक्षकस्य संस्कृतातिरिक्तं सामाजिकाध्ययन-विज्ञानादीनां विषयाणामपि पर्याप्तं ज्ञानं स्यात् येन सः अन्यविषयैः सह तुलनां कुर्वन् छात्रेभ्यः संस्कृतभाषायाः बोधं प्रयच्छन् तेषां ज्ञानस्य व्यापकतां सम्पादयेत् ।

## सर्जनात्मकः

संस्कृतशिक्षके साहित्यसर्जनक्षमता अपि स्यात् । एतेन साहित्यसंवर्धने साहाय्यं लभ्यते । तथा च एतादृशैः समर्थशिक्षकैः छात्राणां सर्जनशीलता अपि विकासयितुं शक्यते ।

## कुशलः अभिनेता

संस्कृतशिक्षकः शोभनवाचा लययतिगति-आरोहावरोहसहितं श्लोकानां पाठं कुर्यात् । एतेन सह तस्मिन् अभिनयकला अपि स्यात् येन तस्य मुखमुद्राभिः आकारैरिङ्गितैश्च छात्राणां विषयबोधे सौलभ्यं स्यात्, संस्कृतं प्रति रुचिश्च उद्भवेत् ।

## संस्कृतशिक्षकस्य भाषा सन्दर्भे गुणाः

प्रायः संस्कृतशिक्षणे कक्ष्यातः बहिः संस्कृतं न श्रूयते । अतः प्रायः केवलं संस्कृतकक्ष्या एव तत् स्थानं यत्र छात्राः संस्कृतं श्रोतुम् अवसरं प्राप्नुवन्ति। अतः यदि संस्कृतकक्ष्यायाम् एव संस्कृतं न भविष्यति तर्हि कुत्र भविष्यति ! एतदर्थं यः या वा संस्कृतकक्ष्यायां संस्कृतमाध्यमेन एव शिक्षणं कर्तुं सिद्धः सिद्धा वा भवति सः सा वा वस्तुतः संस्कृतशिक्षकः शिक्षिका वा। यतोहि छात्राः अनुकरणशीलाः भवन्ति । संस्कृतं श्रुत्वा दृष्ट्वा च संभाषणानुशीलाः भवन्ति । छात्राणां त्रुटयः शिक्षकाणां कृते उपचारात्मकशिक्षणार्थं विभिन्नान् अवसरान् कल्पयन्ति । अतः कुशलसंस्कृतशिक्षकः शिक्षिका वा निदानोपचारात्मकप्रक्रियायाः माध्यमेन मूल्याङ्कनं कुर्वन् कुर्वन्ती वा छात्राणां संस्कृतसंभाषणस्य सामर्थ्यं वर्धयितुं सर्वदा सज्जः सज्जा वा भवति। भाषिककुशलतायाः सन्दर्भे कुशलसंस्कृतस्य शिक्षकस्य शिक्षिकायाः वा गुणाः निम्नलिखितरूपेण द्रष्टुं शक्यन्ते .....




एवमेव सौम्यव्यक्तित्वस्य दृष्ट्या संस्कृतशिक्षकस्य शिक्षिकायाः वा व्यक्तित्वगुणाः श्रीमद्भगवद्गीतायाम् उल्लिखिताः -

**मन:प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।**
**भावसंशुद्धिरित्येतत्तपो मानसमुच्यते॥**

एवमेव अन्यत्र अपि उल्लिखितमेव

**नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः।**
**रत्नलोकः शुचिर्वाग्मी रूढवंशस्स्थिरो युवा॥**




१९९० तमे ख्रिष्टाब्दे आचार्यराममूर्ति-आयोगेन 'राष्ट्रिय-शिक्षा-नीतिः १९८६' इत्यस्योपरि एकं समीक्षाप्रतिवेदनं लिखितम् । 'जागरूकं तथा मानवीयसमाजं प्रति' इति तस्य प्रतिवेदनस्य शीर्षकम् आसीत् । मानवीयमूल्यानाम् आधारः नैतिकता अस्ति एतस्य सैद्धान्तिकरूपस्य क्रियान्वयनं संस्कृतमाध्यमेन भवति । अतः संस्कृतशिक्षकस्य भूमिका इतोऽपि अधिका भवति । १९९६ तमे ख्रिष्टाब्दे युनेस्को इत्यस्य डिलोर्स-आयोगः शिक्षायाः चत्वारः स्तम्भाः इति वर्णयति-

1. Learning to know (ऋतं ज्ञानान्न मुक्तिः)
2. Learning to do (कर्मण्येवाधिकारस्ते....)
3. Learning to be (मनुर्भव)
4. Learning to live together (सङ्गच्छध्वम्.......)

एतेषां सम्बन्धः संस्कृतेन सह अस्ति, अतः संस्कृतशिक्षकः नूतनयुगनिर्माता रूपेण आत्मानं प्रतिष्ठापयेत्।

संस्कृतशिक्षणं नाम संस्कृतेन एव **संस्कृतभाषाशिक्षणम्** इति।

*****